# Shri Sadashivashtakam

# શ્રીસદાશિવાષ્ટકમ્

## Document Information

Text title : sadAshivAShTakam 2

File name : sadAshivAShTakam.itx

Category : shiva, pradIptakumArananda, aShTaka

Location : doc_shiva

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : September 11, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2020

*sanskritdocuments.org*

Shri Sadashivashtakam

# શ્રીસદાશિવાષ્ટકમ્

નન્દિસ્કન્ધવિરાજિતં ગિરિજાપતિં સુરસુન્દરં
ગઙ્ગાધારકપાપનાશકતાણ્ડવપ્રિયનાગરમ્ ।
કામધ્વંસકયોગકારકમોક્ષદાયકત્ર્યમ્બકં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૧॥

ઓઙ્કારેશ્વરભૈરવં પ્રમથેશ્વરં વટુકેશ્વરં
શ્રીમુક્તેશ્વરભીમશઙ્કરલોકનાથમહેશ્વરમ્ ।
પાતાલેશ્વરનન્દિકેશ્વરશૂલિનં કપિલેશ્વરં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૨॥

ઈશાનેશ્વરભૂતખેચરક્ષેત્રપાલકયોગિનં
નેત્રજ્વાલકદક્ષનાશકરામતારણકારિતમ્ ।
કણ્ઠે વાસુકિસર્પશોભિતકાલકૂટવિશોષિતં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૩॥

બ્રહ્મામાધવશક્રભાસ્કરચન્દ્રનારદસેવિતં
હેરમ્બાનલયક્ષમારુતવિશ્રવાસુતપૂજિતમ્ ।
કૈલાસાલયચારિણં પરમેશ્વરં ગિરિવાસિનં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૪॥

યોગ્નીભીષણકાલકૌણપરક્ષકિન્નરવન્દિતં
સિદ્ધશ્રીધનજૈનગુહ્યકનાગનાયકચર્ચિતમ્ ।
કાલીકાન્તનૃમુણ્ડલમ્બિતપાદપઙ્કજશોભિતં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૫॥

લિઙ્ગે શોભિતબ્રહ્મભાસ્વરસત્યસૌરભનિર્ગુણં
માયાતામસસત્ત્વરાજસગૌણકારણકારિતમ્ ।
વિદ્યાપઙ્કજધારિણં પુરુષાર્થકારકમઙ્ગલં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૬॥

બ્રહ્માણ્ડાલયજીવનાયકનાયકેશ્વરપૂજિતં
વં વં વં વમઘોષિતં વિજયારસેન વિલાસિતમ્ ।
શ્રીશ્રીશ્રી અવધૂતશેખરસિદ્ધગોરખનામિતં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૭॥

શ્રીમૃત્યુઞ્જયચન્દ્રશેખરશ્રીસ્વપ્નેશ્વરશૂલિનં
માર્કણ્ડેશ્વરશ્રીસુરેશ્વરભસ્મચન્દનલેપિતમ્ ।
દિક્પાલાવૃતવેદવર્ણિતદિવ્યતાધનદાયકં
વન્દે શ્રીહરપાર્વતીવરદાયકં શિવશઙ્કરમ્ ॥ ૮॥

ઇતિ શ્રીપ્રદીપ્તનન્દશર્મવિરચિતં શ્રીસદાશિવાષ્ટકં સમ્પૂર્ણમ્ ।

Composed, encoded, proofread by Dr. Pradipta kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*Shri Sadashivashtakam*
pdf was typeset on December 28, 2020

Please send corrections to *sanskrit@cheerful.com*